# Shri Nilakanthavarninah Murtisvarupavarnanam

# श्रीनीलकण्ठवर्णिनः मूर्तिस्वरूपवर्णनम्

## Document Information


Text title : Shri Nilakanthavarninah Murtisvarupavarnanam

File name : nIlakaNThavarNinaHmUrtisvarUpavarNanam.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, deities_misc

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीनीलकण्ठवर्णिनः मूर्तिस्वरूपवर्णनम्

(शार्दूलविक्रीडितम्)
मूर्ध्नि स्निग्धसुमञ्जुलासिततसटां देदीप्यमानां जटां
बिभ्रच्चैव विशालभालफलके पुण्ड्रं सचन्द्रं शुभम् ।
विष्णोः सम्पुटकं तथा च विमलां कण्ठे स्रजं तौलस
सोऽयं दिव्यतनुर्हृदि स्फुरतु मे श्रीनीलकण्ठः सदा ॥ १॥

हस्ताब्जे जपमालिकां वरतरां बिभ्रत् सितं सूत्रकं
मौ पीङ्गलमेखलां कटितटे कौपीनमाच्छादनम् ।
सर्वाङ्गे विविधानि चैव तपसश्चिह्नानि बिभ्रद् मुदा
सोऽयं दिव्यतनुर्हृदि स्फुरतु मे श्रीनीलकण्ठः सदा ॥ २॥

कन्दर्पास्त्रसमानदीर्घकुटिल श्लक्ष्णासित भ्रूलो
दीर्घप्रान्तनिमीलिताक्षियुगलो नासाग्रदृष्टिः सदा ।
वर्णीन्द्रो नवमेघमेचकतनूरैणस्थितः स्वात्मदृक्
सोऽयं दिव्यतनुर्हृदि स्फुरतु मे श्रीनीलकण्ठः सदा ॥ ३॥

अस्थित्वग्वपुरेव तीव्रतपसा नित्यं तपस्यारुचिः
शिक्षार्थं तपतां तथापि तपतामिन्द्रस्तपस्विस्तुतः ।
श्रीमच्छारदपूर्णचन्द्रविलसत्स्मेराननः श्रीहरिः
सोऽयं दिव्यतनुर्हृदि स्फुरतु मे श्रीनीलकण्ठः सदा ॥ ४॥

इति श्रीस्वामिनारायणबापाचरित्रामृतसागरे द्वितीयप्रवाहे
द्वाविंशतितमे तरङ्गे श्रीनीलकण्ठवर्णिनः स्वरूपवर्णनं सम्पूर्णम् ।

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*